# Nikamadevakhyadvijakritam Balakrishna Stotram

# નિકામદેવાખ્યદ્વિજકૃતં બાલકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Nikamadevakhyadvijakritam Balakrishna Stotram

File name : nikAmadevAkhyadvijakRRitaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 26/48-100||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# નિકામદેવાખ્યદ્વિજકૃતં બાલકૃષ્ણસ્તોત્રમ્

એવંવિધં તુ માં ધ્યાયન્ પૂજ્ય સન્માન્ય માનદ ।
અવાપ્સ્યસિ ધ્રુવં તાત શાશ્વતં મેઽક્ષરં પદમ્ ॥ ૪૮॥

ઇત્યેવં બોધિતો વિપ્રો નિકામદેવ આદૃતઃ ।
મહાહર્ષં સમાપન્નઃ સામોવાચ તુ નિર્ભયમ્ ॥ ૪૯॥

નૃત્યન્ ગાયન્ હસન્ દેહં કૂર્દયન્ ચેષ્ટયન્ મુહુઃ ।
ઉવાચાઽઽવેશયોગેન નિર્ભયં સામ ગાયનમ્ ॥ ૫૦॥

“બાલકૃષ્ણં પ્રપન્નોઽસ્મિ કિં મે કાલઃ કરિષ્યતિ ।
અક્ષરેશં પરમેશં બ્રહ્મેશં પુરુષોત્તમમ્ ॥ ૫૧॥

શઙ્ખચક્રગદાપદ્મધારિણં પરમેશ્વરમ્ ।
અધોક્ષજં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૫૨॥

અનાદિશ્રીકૃષ્ણનારાયણં શ્રીપતિમચ્યુતમ્ ।
ગોપાલજં પ્રપન્નોઽસ્મિ કિં મે માયા કરિષ્યતિ ॥ ૫૩॥

સર્વાવતારિણં સર્વશક્તિસેવિતમાધવમ્ ।
કામ્ભરેયં પ્રપન્નોઽસ્મિ કિં મે પાપં કરિષ્યતિ ॥ ૫૪॥

કુઙ્કુમવાપિકાતીર્થં લોમશસ્ય શુભાશ્રમમ્ ।
અશ્વસરઃ પ્રપન્નોઽસ્મિ કિં મે કર્મ કરિષ્યતિ ॥ ૫૫॥

ભગવન્તં સર્વધામ્નાં નારાયણનરાયણમ્ ।
રાધાકાન્તં પ્રપન્નોઽસ્મિ કિં મે તૃષ્ણા કરિષ્યતિ ॥ ૫૬॥

માયાતારં કૃષ્ણનારાયણં શ્રીમાધવીપતિમ્ ।
માણિકીશં પ્રપન્નોઽસ્મિ કિં મે કામઃ કરિષ્યતિ ॥ ૫૭॥

સર્વાન્તર્યામિણં સાક્ષાદ્બાલયોગિનીસ્વામિનમ્ ।
પરમેશં પ્રપન્નોઽસ્મિ કિં મે ભ્રાન્તિઃ કરિષ્યતિ ॥ ૫૮॥

અક્ષરેશં ચ મુક્તેશં મુક્તાનિકાપતિં હરિમ્ ।
બ્રહ્મપ્રિયેશં પ્રાપ્તોઽસ્મિ કિં મે સમ્પત્ કરિષ્યતિ ॥ ૫૯॥

ઈશ્વરેશં ચેશ્વરાણીપતિં હરિપ્રિયાપતિમ્ ।
પ્રભુમ્પતિં પ્રપન્નોઽસ્મિ કિ મે તમઃ કરિષ્યતિ ॥ ૬૦॥

પદ્માવતીસ્વામિનં ચ જડચેતનવર્તિનમ્ ।
લક્ષ્મીનાથં પ્રપન્નોઽસ્મિ કિં વાસના કરિષ્યતિ ॥ ૬૧॥

એકરૂપં બહુરૂપં વિશ્વરૂપં તુ બાલકમ્ ।
સતાં પતિં પ્રપન્નોઽસ્મિ કિં મે બન્ધઃ કરિષ્યતિ" ॥ ૬૬॥

"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય પતયે સ્વાહા" ।
નમોઽક્ષરનિવાસાય નમો ગોલોકવાસિને ॥ ૬૩॥

નમો વૈકુણ્ઠનાથાય નમઃ શ્રીપુરવાસિને ।
નમો લલિતાકાન્તાય સર્વકાન્તાય તે નમઃ ॥ ૬૪॥

બાલયોગિનીકાન્તાય બદ્રીકાન્તાય તે નમઃ ।
નિકામદેવનાથાય વાસુદેવાય તે નમઃ ॥ ૬૫॥

નમોઽમૃતનિવાસાય નમોઽવ્યાકૃતવાસિને ।
નમઃ કૈલાસવાસાય હિરણ્યગર્ભવાસિને ॥ ૬૬॥

નમઃ સિદ્ધાધિવાસાય નમઃ સુરાદિવાસિને ।
નમઃ પિતૃનિવાસાય નમો માનવરૂપિણે ॥ ૬૭॥

નમઃ સર્વનિવાસાય નમો મદાત્મવાસિને ।
સુરેશ્વરીહૃદિસ્થાય નમોઽનન્તસ્વરૂપિણે ॥ ૬૮॥

નમો દેહેન્દ્રિયપ્રાણાન્તરાત્મવાસિને સદા ।
નમસ્તે પરમાનન્દ નમસ્તે જ્ઞાનસમ્ભૃત ॥ ૬૯॥

નમસ્તે જ્ઞાનવિજ્ઞાનપ્રદ શ્રીપુરુષોત્તમ ।
નમસ્તે વિશ્વકૃદ્વિષ્ણો નમસ્તે સર્વકારણ ॥ ૭૦॥

નમસ્તે ગોપગોપીશ નમઃ સર્વાર્થસાધક ।
નમસ્તેઽનુગ્રહદાતર્નમસ્તે મોક્ષદ પ્રભો ॥ ૭૧॥

જય કૃષ્ણ જય વિષ્ણો મમાઽભયદ માધવ ।
જય શાન્ત ચિદાનન્દ સચ્ચિદાનન્દ કેશવ ॥ ૭૨॥

જય જીવ જયદ ત્વં જય સાક્ષાજ્જનાર્દન ।
જય શાસ્ત્રાદિસન્ન્યસ્તબીજગર્ભાદ્યુપાસન ॥ ૭૩॥

ત્વં ગુરુસ્ત્વં પિતા ભ્રાતા સુહૃદ્બન્ધુઃ પ્રસૂર્મમ ।
ત્વં મોક્ષસ્ત્વં પરાનન્દસ્ત્વં મે સર્વસ્વમચ્યુત ॥ ૭૪॥

ત્વમુદ્ધર્તા ચ પાતા ચ નેતા ત્વં વિરતિર્ભવાન્ ।
જગત્ સર્વં તવ રૂપરૂપિતં સમ્પ્રકાશતે ॥ ૭૫॥

ત્વં પરબ્રહ્મ ભગવન્ દેવાદ્યૈસ્તુ દુરાસદઃ ।
મયા ત્વાસાદિતશ્ચાઽત્ર બાલયોગિનીવૈભવાત્ ॥ ૭૬॥

કસ્ત્વાં જાનાતિ ચાત્મેશ મુક્તગમ્યં પરાત્પરમ્ ।
સનાતનપુમાંસં તં પુરાણપુરુષોત્તમમ્ ॥ ૭૭॥

પરં રૂપમજાન્તો દિવૌકસો મહર્ષયઃ ।
અવતારમયીમૂર્તીસ્તે ભજન્તિ સુગોચરાઃ ॥ ૭૮॥

અવતારા ભજન્તે ત્વાં પુમાંસમવતારિણમ્ ।
નારાયણા અસઙ્ખ્યાસ્ત્વાં ભજન્તે પરમાયણમ્ ॥ ૭૯॥

નારાયણ્યશ્ચ મુક્તાન્યસ્ત્વાં ભજન્તે પરં પતિમ્ ।
સન્તો મુક્તાસ્ત્વાં ભજન્તે સર્વાવસ્થાસુ સત્પતિમ્ ॥ ૮૦॥

તવાઽજ્ઞાનેન ભગવન્ માનુષાદિનિસર્ગતઃ ।
ક્ષન્તુમર્હસિ સર્વં મે યત્કૃતં ન કૃતં તવ ॥ ૮૧॥

સર્વાવસ્થાસુ સર્વત્ર સર્વકાલેષુ સર્વથા ।
અચલા તુ હરે ભક્તિસ્તેંઽઘ્રિયુગેઽસ્તુ મે પ્રભો ॥ ૮૨॥

પ્રીતિસ્ત્વય્યેવ સતતં ભવત્વાત્યન્તિકી મમ ।
સર્વકામફલદાતસ્ત્વયિ ભક્તિર્દૃઢાસ્તુ મે ॥ ૮૩॥

સ્તોત્રં કર્તુમનન્તસ્ય કઃ શક્નોતિ તુ માનવઃ ।
તથાપિ વ્યાપૃતં વાક્યં ક્ષમસ્વ નાથ તે નમઃ ॥ ૮૪॥

પુરુષોત્તમયોગેન નિર્ભયત્વં પ્રજાયતે ।
તવ યોગેન પુરુષઃ પુરુષોત્તમતાં વ્રજેત્ ॥ ૮૫॥

અધન્યો જાયતે ધન્યસ્ત્વસાધુઃ સાધુતાં વ્રજેત્ ।

અભાગ્યો ભાગ્યવાન્ સ્યાચ્ચ તે સ્તવાત્ પુરુષોત્તમ ॥ ૮૬॥

અપિ લોકબહિષ્કાર્યા યદિ તે શરણં ગતાઃ ।
સાધુશીલા હિ તે સર્વે જાયન્તે પઙ્ક્તિપાવનાઃ ॥ ૮૭॥

યેષાં સર્વાધિપે કૃષ્ણે ભક્તિરવ્યભિચારિણી ।
અપિ ચાણ્ડાલકર્માણસ્તેઽપિ વિપ્રોત્તમોત્તમાઃ ॥ ૮૮॥

અપિ શૌચસમાચારાઃ કૃષ્ણે તે સઙ્ગવર્જિતાઃ ।
શ્મશાનવાસાસ્તે સર્વે સર્વકિલ્બિષસમ્ભૃતાઃ ॥ ૮૯॥

તવ ધ્યાનપરા યે ચ તવ પૂજાપરાયણાઃ ।
તવ પ્રસાદભોક્તારસ્તે સદા વિઘસાશિનઃ ॥ ૯૦॥

આરાધ્ય સતતં ત્વાં શ્રીહરિં સર્વસુખપ્રદમ્ ।
પ્રાપ્ય ત્વાં પરમાત્માનમેષ્ટવ્યં નાવશિષ્યતે ॥ ૯૧॥

સાધુભિશ્ચિન્ત્યતે યશ્ચ સાધ્વીભિઃ કામ્યતે તુ યઃ ।
પીયતે યોગમાપન્નૈર્યઃ સ કૃષ્ણોઽસ્તુ મે હૃદિ ॥ ૯૨॥

ભાવપુષ્પૈઃ પૂજયામિ શ્રદ્ધાઞ્જલિપ્રદોઽસ્મિ ચ ।
આત્માનં દક્ષિણાં કૃત્વાઽર્પયામિ તે પરેશ્વર ॥ ૯૩॥

યથા સર્પિઃ શરીરસ્થં ગવાં ન કુરુતે બલમ્ ।
નિર્ગતં કર્મસંયુક્તં દત્તં તાસાં બલપ્રદમ્ ॥ ૯૪॥

તથા ત્વં હૃદયસ્થોઽપિ માનવાનાં બલાય ન ।
ત્વમેવ નિર્ગતઃ સાક્ષાદ્ભૂતો બલાય વિઘ્રસે ॥ ૯૫॥

વિનાઽઽરાધનયા કૃષ્ણ ત્વં કૃપાવશગો મમ ।
પ્રત્યક્ષં માનવં રૂપં દૃષ્ટં નારાયણાચ્યુત ॥ ૯૬॥

સદૈવ સેવિતં ચાપિ દિવ્યં રૂપં પ્રદર્શય ।
યદ્યહં પાત્રમસ્મ્યત્ર કૃપાપાત્રં ભવામિ ચેત્ ॥ ૯૭॥

વિપ્રત્વં મે ગતં ચાપિ ત્વય્યેવ તત્સમર્પિતમ્ ।
મુક્તત્વં વર્તતે મે ચેત્ સર્વાંશે તવ ભક્તિમાન્ ॥ ૯૮॥

એવં શ્રીબદરીદેવિ પ્રાર્થિતઃ પરમેશ્વરઃ ।
કૃપયૈવ ભૂસુરાય દિવ્યં રૂપમદર્શયત્ ॥ ૯૯॥

અક્ષરસ્થં ચાઽવતારૈરસઙ્ખ્યૈરાપ્રપૂરિતમ્ ।
મુક્તૈર્મુક્તાનિકાભિશ્ચ સેવિતં કમલાદિભિઃ ॥ ૧૦૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૨૬-અધ્યાયાન્તર્ગતં નિકામદેવાખ્યદ્વિજકૃતં બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૨૬/૪૮-૧૦૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 26/48-100..

Proofread by PSA Easwaran

---

*Nikamadevakhyadvijakritam Balakrishna Stotram*
pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*